# ॥ नवमोऽध्यायः ॥

ध्यानं
ॐ बन्धूक काञ्चननिभं रुचिराक्षमालां
पाशाङ्कुशौ च वरदां निजबाहु दण्डैः ।
बिभ्राण मिन्दु शकलाभरणां त्रिनेत्रं
अर्धाम्बिकेश मनिशं वपुराश्रयामि ॥

ॐ राजोवाच ॥ १॥
विचित्रमिद माख्यातं भगवन् भवता मम ।
देव्याश्चरित माहात्म्यं रक्तबीज वधाश्रितम् ॥ २॥

भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ।
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥ ३॥

ऋषिरुवाच ॥ ४॥
चकार कोप मतुलं रक्तबीजे निपातिते ।
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥ ५॥

हन्यमानं महासैन्यं विलोक्यामर्ष मुद्वहन् ।
अभ्यधाव न्निशुम्भोऽथ मुख्ययासुर सेनया ॥ ६॥

तस्याग्रत स्तथा पृष्ठे पार्श्वयोश्च महासुराः ।
सन्दष्टौष्ठपुटाः क्रुद्धा हन्तुं देवी मुपाययुः ॥ ७॥

आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ।
निहन्तुं चण्डिकां कोपात् कृत्वा युद्धं तु मातृभिः ॥ ८॥

ततो युद्धमती वासीत् देव्या शुम्भ निशुम्भयोः ।
शरवर्ष मतीवोग्रं मेघयोरिव वर्षतोः ॥ ९॥

चिच्छेदा स्ताञ्छरां स्ताभ्यां चण्डिका स्वशरोत्करैः ।
ताडयामास चाङ्गेषु शस्त्रौघै रसुरेश्वरौ ॥ १०॥

निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ।
अताडयन्मूर्ध्नि सिंहं देव्या वाहन मुत्तमम् ॥ ११॥

ताडिते वाहने देवी क्षुरप्रेणासि मुत्तमम् ।
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्ट चन्द्रकम् ॥ १२॥

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ।
तामप्यस्य द्विधा चक्रे चक्रेणाभि मुखागताम् ॥ १३॥

कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ।
आयातं मुष्टि पातेन देवी तच्चाप्य चूर्णयत् ॥ १४॥

आविद्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति ।
सापि देव्यास् त्रिशूलेन भिन्ना भस्मत्व मागता ॥ १५॥

ततः परशु हस्तं तं आयान्तं दैत्य पुङ्गवम् ।
आहत्य देवी बाणौघैर् अपातयत भूतले ॥ १६॥

तस्मिन्निपतिते भूमौ निशुम्भे भीम विक्रमे ।
भ्रातर्यतीव सङ्क्रुद्धः प्रययौ हन्तु मम्बिकाम् ॥ १७॥

स रथस्थ स्तथात्युच्चैर् गृहीत परमायुधैः ।
भुजै रष्टाभि रतुलैर् व्याप्याशेषं बभौ नभः ॥ १८॥

तमायान्तं समालोक्य देवी शङ्ख मवादयत् ।
ज्याशब्दं चापि धनुषश् चकारातीव दुःसहम् ॥ १९॥

पूरयामास ककुभो निज घण्टा स्वनेन च ।
समस्त दैत्य सैन्यानां तेजोवध विधायिना ॥ २०॥

ततः सिंहो महानादैस् त्याजितेभ महामदैः ।
पूरयामास गगनं गां तथैव दिशो दश ॥ २१॥

ततः काली समुत्पत्य गगनं क्ष्मा मताडयत् ।
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥ २२॥

अट्टाट्टहास मशिवं शिवदूती चकार ह ।
तैः शब्दै रसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥ २३॥

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहा राम्बिका यदा ।
तदा जयेत्यभि हितं देवै राकाश संस्थितैः ॥ २४॥

शुम्भे नागत्य या शक्तिर् मुक्ता ज्वालाति भीषणा ।

आयान्ती वह्नि कूटाभा सा निरस्ता महोल्कया ॥ २५॥

सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ।
निर्घात निःस्वनो घोरो जितवा नवनीपते ॥ २६॥

शुम्भ मुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ।
चिच्छेद स्वशरै रुग्रैः शतशोऽथ सहस्रशः ॥ २७॥

ततः सा चण्डिका क्रुद्धा शूलेनाभि जघान तम् ।
स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ॥ २८॥

ततो निशुम्भः सम्प्राप्य चेतनामात्त कार्मुकः ।
आजघान शरैर्देवीं कालीं केसरिणं तथा ॥ २९॥

पुनश्च कृत्वा बाहूनां अयुतं दनुजेश्वरः ।
चक्रायुधेन दितिजश् छादयामास चण्डिकाम् ॥ ३०॥

ततो भगवती क्रुद्धा दुर्गा दुर्गार्ति नाशिनी ।
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ ३१॥

ततो निशुम्भो वेगेन गदा मादाय चण्डिकाम् ।
अभ्यधावत वै हन्तुं दैत्यसेना समावृतः ॥ ३२॥

तस्यापतत एवाशु गदां चिच्छेद चण्डिका ।
खड्गेन शितधारेण स च शूलं समाददे ॥ ३३॥

शूलहस्तं समायान्तं निशुम्भ ममरार्दनम् ।
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥ ३४॥

भिन्नस्य तस्य शूलेन हृदया न्निःसृतोऽपरः ।
महाबलो महावीर्यस् तिष्ठेति पुरुषो वदन् ॥ ३५॥

तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ।
शिरश्चिच्छेद खड्गेन ततोऽसाव पतद्भुवि ॥ ३६॥

ततः सिंहश्च खादोग्र दंष्ट्राक्षुण्ण शिरोधरान् ।
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥ ३७॥

कौमारी शक्ति निर्भिन्नाः केचिन्नेशु र्महासुराः ।
ब्रह्माणी मन्त्र पूतेन तोये नान्ये निराकृताः ॥ ३८॥

माहेश्वरी त्रिशूलेन भिन्नाः पेतुस्तथापरे ।
वाराही तुण्ड घातेन केचिच्चूर्णीकृता भुवि ॥ ३९॥

खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ।
वज्रेण चैन्द्री हस्ताग्र विमुक्तेन तथापरे ॥ ४०॥

केचिद्विनेशु रसुराः केचिन्नष्टा महाहवात् ।
भक्षिताश्चापरे काली शिवदूती मृगाधिपैः ॥ ४१॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
निशुम्भ वधो नाम नवमोऽध्यायः ॥ ९॥